राजन्महौजसम्। एवमन्ये मनुष्येन्द्रा बहवोंऽशा दिवौकसाम्। जज्ञिरे वसुदेवस्य कुले कुलविवर्द्धनाः। गणस्त्वप्सरसां यो वै मया राजन् प्रकीर्त्तितः। तस्य भागः चितौ जज्ञे नियोगाद्वासवस्य ह। तानि षोड़श देवीनां सहस्राणि नराधिप!। बभूवुर्मानुषे लोके वासुदेवपरिग्रहाः। श्रियास्तु भागः सञ्जज्ञे रत्यर्थं पृथिवीतले। भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः। द्रौपदी त्वथ सञ्जज्ञे शचीभागादनिन्दिता। द्रुपदस्य कुले कन्या वेदिमध्यादनिन्दिता। नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी। पद्मायताक्षी सुश्रोणी स्वसिताञ्चितमूर्द्धजा। सर्वलक्षणसम्पन्ना वैदूर्य्यमणिसन्निभा। पञ्चानां पुरुषेन्द्राणां चित्तप्रमथनी रहः। सिद्धिर्धृतिश्च ये देव्यौ पञ्चानाम्मातरौ तु ते। कुन्ती माद्री च जज्ञाते मतिस्तु सुबलात्मजा। इति देवासुराणां ते गन्धर्व्वाप्सरसां तथा। अंशावतरणं राजन्! राक्षसानाञ्च कीर्त्तितम्। ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः। महात्मानो यदूनाञ्च ये जाता विपुले कुले" इति। भा०व०प० रामावतारकथने। "न स देवासुरैः शक्यो युद्धे जेतुं विभावसो!। विहितं तत्र यत् कार्य्यमभितस्तस्य निग्रहः। तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः। विष्णुः प्रहरतां श्रेष्ठः स तत् कर्म करिष्यति। पितामहस्ततस्तेषां सन्निधौ शक्रमब्रवीत्। सर्वैर्देवगणैः सार्द्धं सम्भव त्वं महीतले। विष्णोः सहायानृक्षीषु वानरीषु च सर्वशः। जनयध्वं सुतान् वीरान् कामरूपबलान्वितान्। ततो भागानुभागेन देवगन्धर्वदानवाः। अवतर्त्तुं महीं सर्वे मन्त्रयामासुरञ्जसा। तेषां समक्षं गन्धर्व्वीं दुन्दुभीं नाम नामतः। शशास वरदो देवो गच्छ कार्य्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वी दुन्दुभी ततः। मन्थरा मानुषे लोके कुब्जा समभवत्तदा। शक्रप्रभृतयश्चैव सर्वे ते सुरसत्तमाः। वानरर्क्षवरस्त्रीषु जनयामासुरात्मजान्। तेऽन्ववर्त्तन् पितॄन् सर्वे यशसा च बलेन च। भेत्तारो गिरिशृङ्गाणां शालतालशिलायुधाः। वज्रसंहननाः सर्वे सर्वे चातिबलास्तथा। कामवीर्य्यबलाश्चैव सर्वे युद्धविशारदाः। नागायुतसमप्राणा वायुवेगसमा जवे। यत्रेच्छकनिवासाश्च केचिदत्र वनौकसः" इति। एवमन्येऽप्यवताराः पुराणादौ ज्ञेयाः।

अवतरत्यनेन रूपेण करणे घञ्। येन रूपेणाविर्भूतस्तस्मिन् ४रूपे "मत्स्यादिभिरवतारैरवतारवता वताऽवता वसुधाम्। परमेश्वर! परिपाल्यो भवता भवतापभीतोऽहम्" शङ्करः।

**अवतारण** न० अव+तॄ-णिच्-ल्युट्। भूतादीनामावेशनेन १प्रादुर्भावने, (भूतनामान) २अवरोपणे, ३अन्यप्रस्तावने च करणे ल्युट् स्त्री। अवतारणग्रन्थ।

**अवतारित** त्रि० अव+तॄ-णिच् क्त। "अवरोपिते "सन्तानार्थाय विधये स्वभुजादवतारिता" रघुः।

**अवतीर्ण** त्रि० अव+तॄ-कर्त्तरि क्त। १कृतावगाहने २कृतावरोहणे "कौवेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः" माघः ३अन्यरूपेण प्रादुर्भावे च "तदर्थमवतीर्णोऽसौ मन्नियोगाच्चतुर्भुजः" भा०व०प०।

**अवतूलन** न० तूलैरवकुष्णाति तूलेन तृणाग्रमवघट्टयति अव+तूल+अवघट्टनार्थे णिच्-भावे ल्युट्। तूलेन तूलाग्रावघट्टने। [स्त्रियाम्॥

**अवतोका** स्त्री अवपतितं तोकमस्याः प्रा०ब०। स्रवद्गर्भायां

**अवत्त** त्रि० अव+दो-खण्डने कर्म्मणि क्त। खण्डिते "तत् पयोरवत्तं भवति यत् हृदयस्याग्रेऽवद्यति" शत०ब्रा०।

**अवत्तिन्** त्रि० अवत्तमनेन इष्टा० इनि। कृतखण्डने जने "विविधायजमानाश्चतुरवत्तिनः पञ्चावत्तिनश्चेति" आश्व०श्रौ०

**अवत्सार** पु० ऋषिभेदे सहि "अवत्सारस्य स्पृणवाम" इति ऋ०५,४४,१०, उक्तः।

**अवदंश** पु० अवदश्यते पानरुच्यर्थम् अव+दन्श-कर्म्मणि घञ्। मद्यपानादिप्रोत्साहनसाधने भ्रष्टचर्वणद्रव्ये "अन्यतममासवं पाययेदङ्गारमूल्यावदंशम्" सुश्रु०।

**अवदरण** न० अव+दृ-भावे ल्युट्। विदारे "वृषणयोरवदरणम्" "वेदनाप्रादुर्भावोऽवदरणम्" इति च सुश्रु०।

**अवदाघ** पु० अव+दह भावे घञ् न्यङ्क्वा० हस्य घः। निदाघे।

**अवदात** पु० अव+दै-क्त। १शुभ्रे, २पीते च वर्णे। ३तद्वति ४विशुद्धे "अन्यस्मिन् जन्मनि च न कृतमवदातम्" काद०। ५मनोज्ञे च त्रि०।

**अवदान** न० अव+दो-ल्युट्। १खण्डने, २पराक्रमे ३अतिक्रमे ४शुद्धिकरणे, च अवद्यति रोगमनेन करणे ल्युट्। ५वीरणमूले न०।

**अवदारक** त्रि० अवदारयति अव+दृ-णिच्-ण्वुल्। १विदारके अवयवविभागकारके। २खनित्रे पु०।

**अवदारण** न० अव+दृ-णिच्-भावे ल्युट्। १विदारणे अवयवविभाजने। करणे ल्युट्। २खनित्रे। [विभाजिते।

**अवदारित** त्रि० अव+दृ-णिच् कर्म्मणि क्त। विदारिते

**अवदाह** न० अवसादितोदाहो येन प्रा०ब०। वीरणमूले तस्य सेवने हि तापनिवृत्तिर्वैद्यके प्रसिद्धा